श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५४

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५४

*कालियमर्दने गोगोपानामुज्जीवनवर्णनम्*

त्वत्सेवोत्कस्सौभरिर्नाम पूर्वं कालिन्द्यन्तर्द्वादशाब्दं तपस्यन्।
मीनव्राते स्नेहवान् भोगलोले तार्क्ष्यं साक्षादैक्षताग्रे कदाचित्॥ १ ॥

त्वद्वाहं तं सक्षुधं तृक्षसूनुं मीनं कञ्चिज्जक्षतं लक्षयन् सः।
तप्तश्चित्ते शप्तवानत्र चेत् त्वं जन्तून् भोक्ता जीवितं चापि मोक्ता॥ २ ॥

तस्मिन् काले कालियः क्ष्वेळदर्पात् सर्पारातेः कल्पितं भागमश्नन्।
तेन क्रोधात् त्वत्पदाम्भोजभाजा पक्षक्षिप्तस्तद्दुरापं पयोऽगात्॥ ३ ॥

घोरे तस्मिन् सूरजानीरवासे तीरे वृक्षा विक्षताः क्ष्वेळवेगात्।
पक्षिव्राताः पेतुरभ्रे पतन्तः कारुण्यार्द्रं त्वन्मनस्तेन जातम्॥ ४ ॥

काले तस्मिन्नेकदा सीरपाणिं मुक्त्वा याते यामुनं काननान्तम्।
त्वय्युद्दामग्रीष्मभीष्मोष्मतप्ता गोगोपाला व्यापिबन् क्ष्वेळतोयम्॥ ५ ॥

नश्यज्जीवान् विच्युतान् क्ष्मातले तान् विश्वान् पश्यन्नच्युत त्वं दयार्द्रः।
प्राप्योपान्तं जीवयामासिथ द्राक् पीयूषाम्भोवर्षिभिः श्रीकटाक्षैः॥ ६ ॥

किं किं जातो हर्षवर्षातिरेकः सर्वाङ्गेष्वित्युत्थिता गोपसङ्घाः।
दृष्ट्वाऽग्रे त्वां त्वत्कृतं तद्विदन्तस्त्वामालिङ्गन् दृष्टनानाप्रभावाः॥ ७ ॥

गावश्चैवं लब्धजीवाः क्षणेन स्फीतानन्दास्त्वं च दृष्ट्वा पुरस्तात्।
द्रागावव्रुः सर्वतो हर्षबाष्पं व्यामुञ्चन्त्यो मन्दमुद्यन्निनादाः॥ ८ ॥

रोमाञ्चोऽयं सर्वतो नः शरीरे भूयस्यन्तः काचिदानन्दमूर्छा।
आश्चर्योऽयं क्ष्वेळवेगो मुकुन्देत्युक्तो गोपैर्नन्दितो वन्दितोऽभूः॥ ९ ॥

एवं भक्तान् मुक्तजीवानपि त्वं मुग्धापाङ्गैरस्तरोगांस्तनोषि।
तादृग्भूतस्फीतकारुण्यभूमा रोगात् पाया वायुगेहाधिनाथ॥ १० ॥

**********